Regd. No. KA/SK/MYS-107/2015-17
R.N.I. No. 20007/70

स्थापना : 1970

E-mail-sudharma.sanskritdaily@gmail.com
E-paper-sudharma.epapertoday.com
Website-www.sudharmasanskritdaily.in

# सुधर्मा

केन्द्र-कर्णाटकसर्वकाराभ्यां पुरस्कृता अद्वितीया संस्कृतदिनपत्रिका
SUDHARMA-THE ONLY SAMSKRITHA DAILY

संस्थापकसम्पादकः
गीर्वाणवाणीभूषणं विद्यानिधिः
पण्डित कळले नडादूरु वरदराजय्यङ्गार्यः

सम्पुटः-४७ सञ्चिका -७४ मैसूरु श्रीदुर्मुखीनामसंवत्सरे दक्षिणायणे शरदृतौ आश्वयुजकृष्ण प्रतिपदादि तृतीयायां भरणीनक्षत्रयुक्त मङ्गळवासरः १८ अक्टोबर २०१६ मूल्यम्: ₹ १.२५

## सुभाषितम्

**जनित्वापि महागोत्रे निम्नगा वक्रचेष्टिताः ।**
**वैपरीत्यं वितन्वन्ति समेषु विषमेषु च ।।**
**स्नेहशैत्यं प्रसादश्च कोशत्यागश्च जायते ।**
**आसन्नपरपीडार्थं निस्त्रिंशस्यासितात्मनः ।।**

## वङ्गदेशस्य माहात्म्यम्

वङ्गभूमिरध्यात्मप्रभाया मातृगेहम् । तस्यां भूमौ श्रीरामकृष्णपरमहंसस्य स्वामिविवेकानन्दस्य च जन्म जातम् । हिन्दु धर्मस्य पुनरुत्थाने तयोः गुरुशिष्ययोः योगदानम् असदृशम् । सर्वत्र जगति विवेकानन्दः सनातनधर्मस्य श्रेष्ठत्वं प्रतिपादयामास। भारतदेशस्य प्रजासु च स्वाभिमानं जागरयामास । वङ्गदेशे ततः पूर्वं जातः राजा राममोहनरायः अज्ञानानन्धकारं निवारयितुं ज्ञानप्रदीपम् उज्ज्वलयितुं च प्रयेते । तस्यैव प्रयत्नैः सतीसहगमनाख्या दुष्टा अमानवीया पद्धतिः अपाकृता । ब्रह्मसमाजस्य स्थापनया तेन देशस्य चिन्तनासरणौ नूतनत्वं स्वातन्त्र्यं चानीयत । एवं वङ्गदेशे संजातः श्रीमान् अरविन्दघोषः स्वातन्त्र्यसंग्रामे नासीरभटो बभूव । ततोऽध्यात्मक्षेत्रे साधनां कृत्वा पूर्णयोगम् आविश्चकार । साहित्ये च तस्य कृतयो विशिष्टं चारुत्वं बिभ्रति । बङ्किमचन्द्रः 'वन्दे मातरम्' इति गीतं रचितवान् यत्स्वातन्त्र्य सङ्गामे मुख्यं पात्रम् अवहत् । तस्य कथानकानि अद्यापि देशाभिमानं धर्माभिमानं च जागरयन्ति । वङ्गदेशस्य सुपुत्रो रवीन्द्रनाथठाकुरो विश्वस्मिन् साहित्यसौरभं प्रासारयत् । तस्य गीताञ्जलिः नोबेल्पुरस्कारस्य भाजनीभूतम् । सङ्गीतक्षेत्रे रवीन्द्रसङ्गीतम् इति विशिष्टा शैली तेनोद्भाविता । एवं शरच्चन्द्रः चटर्जिः सामाजिकविषयेषु कथाः कथानकानि च रचयित्वा जनान् अबोधयत्, अरञ्जयच्च । श्री सुभाषचन्द्रः देशप्रेमवताम् अग्रणीः भूत्वा युयुधेः । एवं बहवः उज्ज्वलाः मणयः वङ्गदेशे प्रादुर्भूय भारतदेशस्य कान्तिं वर्धयामासुः ।

**नमो नमस्तेभ्यः सर्वेभ्यः ।**

## स्वयंसेवकहत्या खण्डनीया

बेङ्गळूरु-कर्णाटकराजधान्यां बेङ्गळूरुनगर्यां भानुवारे राष्ट्रियस्वयं-सेवकसंघस्य सदस्यः आर्.रुद्रेशः दुष्टैः हतः इति दारुणा वार्ता श्रूयते। कमर्शियल् स्ट्रीट् इति ख्यातायाः वीथ्याः समीपे मित्रैः सह रुद्रेशः चायं पिबति स्म । तदा द्विचक्रिकया आगतौ दुष्कर्माणौ वास्या रुद्रेशस्य कण्ठं छित्त्वा बर्बररीत्या अवधिष्टाम्। जनानां पश्यतां घटनैषा प्रवृत्ता । वैयक्तिकद्वेषो वा समुदायवैषम्यं वा हननस्य कारणं स्यादिति आरक्षकाणाम् ऊहा । अपराधिनोः ग्रहणाय प्रयत्नाः प्रवर्तन्ते ।

## कुवैत्संसत्सभायाः विसर्जनम्

कुवैत्-कुवैत्देशस्य राजा शेखसबा अल् अहमद्अल् सभा भानुवारे कुवैत्देशस्य संसत्सभां विसर्जयितुं आदेशं चकार। खारिराष्ट्रेक रक्षणा परिस्थितयः आतङ्ककारिण्यः वर्तन्ते। एतैस्साकं राष्ट्राणाम् अर्थ-व्यवस्थाः अपि कलुषिता विद्यन्ते। अतः राजशासनेषु काठिन्यं कर्तव्य प्रज्ञां प्रामाणिकतां च समुत्पादयितु मत्र शीघ्रातिशीघ्रं निर्वाचनानि प्रचलेयुः। अतः संसत्सभां विसर्जयतु भवानिति कुवैत् देशस्य संसत्सभाध्यक्षः अल्घानेम् कुवैत् राजानमुवाच । अनुपदमेव एकदिनानन्तरं कुवैत्देशस्य भूपः संसत्सभां विसर्जयतु भवानिति सभाध्यक्षमुवाच। तदनुसारात् संसत्सभा विसृष्टा। कुवैत्देशस्य संविधानस्य अनुसारात् मासद्वये सार्वत्रिक निर्वाचनानि भवेयुरेव।

## भुवनेश्वरे अग्निदुर्घटना

✻ भुवनेश्वरम् - ओडीशराज्यस्य राजधान्यां भुवनेश्वरनगर्यां चिकित्सालये अग्निदुर्घटना सोमवारस्य रात्रौ जाता। अस्यां दुर्घटनायां चतुर्विंशतिर्जनाः मृताः। त्रिंशत् अन्ये जनाश्च व्रणिताः। विद्युत्सपर्कदोषेण (Short Circuit) अग्निः सहसा प्रससार। अग्निशामक दलं शमने प्रवृत्तम्। अन्यत्राग्नि-प्रकोपदग्धाः प्रायः चिकित्सालयम् आनीयन्ते । चिकित्सालये प्रमादो जायते चेत् किं कर्तव्यम्? अतः देशे सर्वत्र चिकित्सालयेषु बहुधा जागरूकता आश्रयणीया । विद्युज्जाल सम्पर्कस्य विषये अनादरः कदापि न कर्तव्यः। सततपरीक्षणा प्रवर्तनीया । अन्यथा दुर्घटना अनिवार्या स्यात् ।

## तीर्थोद्भवदर्शनम्

तलकावेरी-सोमवासरस्य प्रातः काले अत्र तीर्थोद्भवस्य दर्शनाय भक्ताः सहस्रशो मिलिताः। शुभमुहूर्ते तीर्थोद्भवदर्शनं लब्धा पूता अभवन्। कावेरी कन्यका सुज्योतिः इति तिसृणां नदीनां संगमे तीर्थोद्भवो वार्षिको भवति । सुप्रसिद्धा नटी रम्या च तीर्थोद्भवदर्शनायागता । पञ्चदशसहस्राधिकेभ्यो भक्तेभ्यः भोजनं परिवेषितम्। तीर्थोद्भवानन्तरं सङ्गमे स्नानं पुण्यदम् इति भावना आस्तिकेषु वर्तते ।

## जयललितायाः स्थितिः

चेन्नै-तमिळुनाडुराज्यस्य मुख्य-मन्त्रिणी श्रीमती जयललिता अस्वस्था । चिकित्सालये वर्तमानायाः तस्याः आरोग्यविषये विविधाः वार्ताः श्रूयन्ते । बहवो वैद्याः चिकित्सायां निरताः सन्ति। सिंहपुरात् (Singapore) वैद्यानां समुदायोऽप्यागतः। जयललितायाः स्पन्दनं सम्यगस्ति, तस्याः स्थितिः उत्तमा भविष्यतीति भिषजो वदन्ति।

## अतिचिन्ता मृत्युकारिण

वाषिङ्गटन्-उद्योगेषु उद्यमेषु च अतिचिन्तां कुर्वाणाः मृत्युम् आह्वयन्तीति संशोधकाः कथयन्ति। येषु उद्योगेषु अतिचिन्ता नास्ति तान् उद्योगान् अवलम्बमानाः दीर्घं जीवन्ति। एतवता कालेन एतावत् साधनीयम् एव इति निर्बन्धो यत्र वर्तते तत्र कार्यं कुर्वाणाः अल्पायुषो भवन्तीति संशोधकानाम् अभिप्रायः।

## ब्रिक्स्पञ्चराष्ट्रसमावेशे उग्रनिग्रहसूत्राणि

गोवा-भारतस्य गोवाराज्ये ब्रिक्स्पञ्च राष्ट्राणां वार्षिकसमावेशः समभवत्। अन्तिमदिवसे स्वीकृते निर्णये उग्रात-तायिनः नाशयितुं कानिचननिग्रहण-सूत्राणि अङ्गीकृतानि पञ्चराष्ट्रनेतृभिः। तानि उग्रनिहणसूत्राण्येवं सन्ति-

१. भयोत्पादनानि हिंसात्मककार्याणि धार्मिकमूलभूतवादान् च कर्तुं सन्नद्धान् उग्रसङ्घटनान् वयं सर्वे निरोधयितुं कार्यसूचीमेकां स्वीकुर्मः।

२.विदेशीयस्वदेशीयोग्राततायिनां चलनवलनानि निरोद्धव्यानि तथा एतानि कार्याणि कर्तुं ये केच धनादि-साहाय्यानि कुर्वन्ति तान् वयं निर्बन्धयामः धनादिकं नैव दातव्यमिति।

३.अक्रमेण मददायीनि औषधानि रहसि ये उग्रेभ्यः प्रदास्यन्ति धनादिकं प्रदास्यन्ति धनव्यवहारान् कुर्वन्ति दुष्कृत्यानि कुर्वन्ति तान् जागरूकेण ज्ञात्वा एतानि नैव कुर्वन्त्विति प्रतिबन्धयेयुस्सर्वे ।

४.भयोत्पादककुकृत्यानि कुर्वतां रहस्य स्थानानि वासस्थानानि प्रध्वंसयेयुत्सर्वे नेतारः।

५. भयोत्पादकजनेभ्यः धनप्रदायक जनाः ये सन्ति शस्त्रास्त्रदातारः ये च वर्तन्ते तान् ज्ञातुं अन्ताराष्ट्रियस्तरं अन्ताराषिष्ट्र यधनक्रि याबलं समर्थयितुं पुनरपि परिशीलनानि सर्वे कुर्युः।

६.येषु राष्ट्रेषु उग्राततायिनः दुष्कृत्यानि कृत्वा जनान् नाशयामासु जनधनादि सम्पन्मूलानि ध्वंसयामासुः तेषु राष्ट्रेषु राजकीयस्थिरताः वर्तन्ते। जनेषु भीत्यादयः सन्ति। प्रशासकाः प्रजाशासनानि कर्तुं अतीव प्रयासान् लेभिरे तादृशनेतृन् सबलीकर्तुं तेषु राष्ट्रेषु राजकीसामाजिकपरिस्थिसतीः पुनरपि यथावत् प्रतिष्ठापयितुं वयं सर्वे सहाय्यहस्तान् प्रदास्यामः। दुष्ट-दमनाय वयमपि सभायाः भवामः इति।

## नरसिंहः पिहेच्डिभाक्



मैसूरु-मेलुकोटेक्षेत्रस्य जि.वि. नरसिंहः मैसूरुविश्वविद्यानिलयस्य वाणिज्यविभागे वाणिज्यविभाग प्राध्यापकस्य सि.एस्.राम-नारायणस्य मार्गदर्शने आंग्ल-भाषायां "Effectiveness of Staff Training Programmes in Banking Sector-A comparative Study of Public and Private Sector Banks" शीर्षिकायां महाप्रबन्धमेकं विरच्य मैसूरुविश्वविद्यानिलयाय समर्पयामास। परीक्षसमितिसदस्याः महाप्रबन्धमेकं सम्यक्परिशील्य परिशोध्य पिएच्डिपदव्यर्थे अङ्गीकरणीय इति ऊचुः। तदनुसारात् मैसूरुविश्वविद्यानिलयः अस्य महाप्रबन्धं पिहेच्डिमहापदवीं प्रदातुमङ्गीचकार। अधुना जि.वि. नरसिंहः पिएच्डिपदवीभाजन-मभवत्।

## नञ्जुण्डेश्वरदर्शनम्

नञ्जनगूडु-अत्र विराजमानस्य नञ्जुण्डेश्वर इति श्रीकण्ठेश्वर इति ख्यातस्य भगवतः शिवस्य दर्शनाय भानुवारे सहस्रशो भक्ताः समागताः। प्रगे चतुर्वादनवेलायाम् एव दर्शनम् आरभ्यत । भक्तानां पङ्क्तिः तथापि दर्शनम् आरभ्यत । भक्तानां पङ्क्तिः तथापि द्राघीयसी भवति स्म । जनेषु दैवभक्तिः अविच्छिन्ना वर्तत एवेति स्पष्टं भवति ।

## नक्सलीयानां बन्धनम्

नोयिडा - राष्ट्रराजधान्यां नवदिल्ल्यां तथा उत्तरप्रदेशे विनाशं कर्तुम् उद्यताः दश नक्सलीयाः आरक्षकैः बद्धाः। बद्धेभ्यः अपारां शस्त्रास्त्रसामग्रीं चारक्षकाः वशीकृतवन्तः।

## अतुल्यतेजोभूमिपालो मृतः

बेङ्काक्-थायूलेण्डदेशस्य राजा भूमिपालाः अतुल्यतेजाः गुरुवारे दिवं गतः। तस्य वयः अष्टाशीतिर्वर्षाणि । थायूलेण्ड-देशस्य प्रजाः तस्मिन् भक्तिं रक्षन्ति स्म ।